## शास्त्री-षष्ठसत्रार्ध-पञ्चमपत्रम्

।।शुक्लयजुर्वेदः।।

**प्रश्नः१ नवमेऽध्याये को यज्ञः वर्ण्यते?**

उत्तरम् वाजपेयलक्षणो यज्ञः।

**प्रश्नः२ केतपूः कः?**

उत्तरम् केत शब्देनान्नं प्रोच्यते अन्नस्य पविता, अन्नं पुनातीति केतपूः, अन्नस्य पावयिता।

**प्रश्नः३ नवमेऽध्याये कियंतो मंत्राः?**

उत्तरम् चत्वारिंशित्सख्याकाः मन्त्राः सन्ति।

**प्रश्नः४ ब्राह्मणानां राजा को भवति?**

उत्तरम् सोमो ब्राह्मणानां राजा।

**प्रश्नः५ वाजपेयमन्त्रा कियन्मन्त्रपर्यन्तं सन्ति।**

उत्तरम् चतुस्त्रिंशन्मन्त्रपर्यन्तं वाजपेयमन्त्रा सन्ति।

**प्रश्नः६ वाजपेयमन्त्राणां ऋषिः कः।**

उत्तरम् तेषां वृहस्पतीन्द्रावृषी विद्येते।

**प्रश्नः७ राजसूयमन्त्राणां द्रष्टा कः?**

उत्तरम् वरुणः ऋषिः।

**प्रश्नः८ के देवाः अग्निनेत्राः?**

उत्तरम् पुरः सदः।

**प्रश्नः९ विश्वदेवनेत्राः के देवाः सन्ति।**

उत्तरम् पश्चात्सदः।

**प्रश्नः१० दुष्टरः कः।**

उत्तरम् दुस्तरः केनापि तर्त्तुमशक्यः।

**प्रश्नः११ द्वादशाक्षरेण इत्यस्य कोऽभिप्रायः?**

उत्तरम् जगत्यादित्याः जगतीच्छन्दसोभिमानिनी देवतामहं जयेम यथा विश्वेदेवा उदजयन्।

**प्रश्नः१२ स्वाहा इत्यस्याभिप्रायः कः?**

उत्तरम् इदं हविः सुहुतमस्तु इति।

**प्रश्नः१३ वयं राष्ट्रे जागृयाम इत्यस्य तात्पर्यं किम्?**

उत्तरम् वयं च ताभिरभिषिक्ताः स्वकीये देशे अप्रमत्ता भवाम।

**प्रश्नः१४** **नृम्णं किम्।**

उत्तरम् धनं।

**प्रश्नः१५** **सवनं नाम किम्?**

उत्तरम् यज्ञो वै सवनम्।

**प्रश्नः१६** **विशिप्रियाः क उच्च्यन्ते?**

उत्तरम् शोभनाभिषव संस्कृताः सुपूवाश्च विशिप्रियाः।

**प्रश्नः१७** **कति विकृतिपाठाः?**

उत्तरम् अष्टौ विकृतयः।
जटामाला शिखारेखा ध्वजोदण्डोरथो धनः।
अष्टौविकृतयः प्रोक्ता क्रमपूर्वा महर्षिभिः।।

**प्रश्नः१८** **ध्वजः कः?**

उत्तरम् ब्रूयादादेः क्रमं सम्यगन्तादुत्तारयेद्यदि।
वर्गे वा ऋचि वा यत्र पठनं स ध्वजः स्मृतः।।

**प्रश्नः१९** **ध्वजपाठः कथं भवति?**

उत्तरम् मंत्रादितोऽन्तपर्यन्तं अन्ततश्चादि पर्यन्तं यदा क्रमपाठः क्रियते तदा ध्वजपाठः।

**प्रश्नः२०** **दण्ड पाठस्य लक्षणं किम्?**

उत्तरम् क्रममुक्त्वाविपर्यस्य पुनश्च क्रममुत्तमम्।
अर्धर्चादेवमुक्तोऽयं क्रमदण्डोभिधीयते।।

**प्रश्नः२१** **को रथ पाठः?**

उत्तरम् एकस्य पदस्यार्धर्चोवा पदद्वयं यत्र दण्ड पाठ विधिनोच्चार्यते स रथ उच्यते।

**प्रश्नः२२** **रथः कतिविधः?**

उत्तरम् रथस्त्रिविधः द्विचक्रः त्रिचक्रश्चतुश्चक्रभेदात्।

**प्रश्नः२३** **घनः कः?**

उत्तरम् पादशोऽर्धर्चशोवापि सहोक्त्यादण्डवद्रथः।
आदिक्रमं नयेदन्तं घनमाहुर्मनीषिणः।।
अन्तात्क्रमं नयेत् पूर्वमादिपर्यन्तमानयेत्।
आदि क्रमं नयेदन्तं घनमाहुर्मनीषिणः।।

**प्रश्नः२४** **जटादण्डाभ्यां कः पाठः सिद्धयतिः।**

उत्तरम् घनपाठः।

**प्रश्नः२५** **पञ्चसन्धियुक्तोघनपाठः कथं भवति?**

उत्तरम् पदद्वयस्य क्रमोत्क्रम व्युत्क्रमाभिक्रमसंक्रमैः पञ्चसन्धिपाठो भवति। सघनवल्लभो भवति द्विधा प्रथमोऽयम्।

**प्रश्नः२६** **द्वितीयो घनवल्लभः कथं ज्ञेयम्?**

उत्तरम् पञ्चसन्धि युतेन, अन्तादिपर्यन्तमादेरन्तपर्यन्तं च पाठेन द्वितीयोघनवल्लभः।

**प्रश्नः२७** **ध्वजपाठं कश्चकार?**

उत्तरम् विश्वामित्रोऽपठद्ध्वजम्।

**प्रश्नः२८** **दण्डपाठः कस्याविष्कारः?**

उत्तरम् दण्डं पराशरोऽवोचद्।

**प्रश्नः२९** **कश्यपः कं पाठञ्चकार?**

उत्तरम् कश्यपोरथमब्रवीत्।

**प्रश्नः३०** **घनपाठः केनाविष्कृतम्?**

उत्तरम् घनमत्रिमुनिः प्राह विकृतीनामयं क्रमः।

**प्रश्नः३१** **वेदे उपसर्गः भिन्नो भवति वा क्रियायोगे?**

उत्तरम् भिन्नो भवति।

**प्रश्नः३२** **क्रियातो भिन्नोपसर्गं दर्शयत?**

उत्तरम् ''पाप्मनापृङ्क्तम्''।

**प्रश्नः३३** **महीधराचार्येण कुत्रोपसर्गः क्रियया योजितः?**

उत्तरम् मां पाप्मना विपृङ्क्तम्, वियोजयतम्।

**प्रश्नः३४** **आचार्य महीधरः किं नामभाष्यं व्यदधात्?**

उत्तरम् वेददीपनाम्ना।

**प्रश्नः३५** **महीधराचार्यः स्वभाष्ये कां त्रिवेणीं प्रवाहयति?**

उत्तरम् मन्त्रब्राह्मणसूत्रात्मिकां त्रिवेणीं।